# pradoShastotram

# પ્રદોષસ્તોત્રમ્

## Document Information

Text title : pradoShastotram

File name : pradosha.itx

Category : shiva, stotra

Location : doc_shiva

Author : Traditional

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : January 01, 2005

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# પ્રદોષસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
જય દેવ જગન્નાથ જય શઙ્કર શાશ્વત ।
જય સર્વસુરાધ્યક્ષ જય સર્વસુરાર્ચિત ॥ ૧॥

જય સર્વગુણાતીત જય સર્વવરપ્રદ ।
જય નિત્ય નિરાધાર જય વિશ્વમ્ભરાવ્યય ॥ ૨॥

જય વિશ્વૈકવન્દ્યેશ જય નાગેન્દ્રભૂષણ ।
જય ગૌરીપતે શમ્ભો જય ચન્દ્રાર્ધશેખર ॥ ૩॥

જય કોટ્યર્કસઙ્કાશ જયાનન્તગુણાશ્રય ।
જય ભદ્ર વિરૂપાક્ષ જયાચિન્ત્ય નિરઞ્જન ॥ ૪॥

જય નાથ કૃપાસિન્ધો જય ભક્તાર્તિભઞ્જન ।
જય દુસ્તરસંસારસાગરોત્તારણ પ્રભો ॥ ૫॥

પ્રસીદ મે મહાદેવ સંસારાર્તસ્ય ખિદ્યતઃ ।
સર્વપાપક્ષયં કૃત્વા રક્ષ માં પરમેશ્વર ॥ ૬॥

મહાદારિદ્ર્યમગ્નસ્ય મહાપાપહતસ્ય ચ ।
મહાશોકનિવિષ્ટસ્ય મહારોગાતુરસ્ય ચ ॥ ૭॥

ઋણભારપરીતસ્ય દહ્યમાનસ્ય કર્મભિઃ ।
ગ્રહૈઃ પ્રપીડ્યમાનસ્ય પ્રસીદ મમ શઙ્કર ॥ ૮॥

દરિદ્રઃ પ્રાર્થયેદ્દેવં પ્રદોષે ગિરિજાપતિમ્ ।
અર્થાઢ્યો વાઽથ રાજા વા પ્રાર્થયેદ્દેવમીશ્વરમ્ ॥ ૯॥

દીર્ઘમાયુઃ સદારોગ્યં કોશવૃદ્ધિર્બલોન્નતિઃ ।
મમાસ્તુ નિત્યમાનન્દઃ પ્રસાદાત્તવ શઙ્કર ॥ ૧૦॥

શત્રવઃ સંક્ષયં યાન્તુ પ્રસીદન્તુ મમ પ્રજાઃ ।

નશ્યન્તુ દસ્યવો રાષ્ટ્રે જનાઃ સન્તુ નિરાપદઃ ॥ ૧૧॥

દુર્ભિક્ષમરિસન્તાપાઃ શમં યાન્તુ મહીતલે ।
સર્વસસ્યસમૃદ્ધિશ્ચ ભૂયાત્સુખમયા દિશઃ ॥ ૧૨॥

એવમારાધયેદ્દેવં પૂજાન્તે ગિરિજાપતિમ્ ।
બ્રાહ્મણાન્ભોજયેત્ પશ્ચાદ્દક્ષિણાભિશ્ચ પૂજયેત્ ॥ ૧૩॥

સર્વપાપક્ષયકરી સર્વરોગનિવારણી ।
શિવપૂજા મયાઽઽખ્યાતા સર્વાભીષ્ટફલપ્રદા ॥ ૧૪॥

॥ ઇતિ પ્રદોષસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*pradoShastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*